विषय कोडः ६०१

# NEB - GRADE XII

## ज्योतिषम् (उत्तरमध्यमा पाठ्यक्रम)
## द्वितीयपत्रम्

*परीक्षार्थिभिः प्रश्नस्योत्तरं यथासंभवं स्वकीयैः शब्दैर्लेखनीयम् । दक्षिणपार्श्वे सन्निविष्टा अङ्काः पूर्णाङ्कान् द्योतयन्ति ।*

**समयः घण्टात्रयम्** **पूर्णाङ्काः १००**

एकः प्रश्नः समाधेयः । १५

१. केन्द्रात् पूर्णज्यार्धबिन्दुगता रेखा तदुपरि लम्बरूपिणी भवति । या च केन्द्रात् पूर्णज्योपरि लम्बरूपिणी सा तामर्धयतीति कथमुपपद्यते ?

२. इष्टचापक्षेत्रस्य वृत्तं विधेयम् ।

एकः प्रश्नः समाधेयः । १५

३. वर्गक्षेत्रान्तर्गतं वृत्तं विधेयम् ।

४. अभीष्टवृत्तान्तर्गतं तादृशं त्रिभुजं कार्यं यस्य पृथक् त्रयः कोणाः क्रमेण निर्दिष्टत्रिभुजस्य त्रिभिः कोणैस्तुल्या भवेयुः ।

द्वौ प्रश्नौ समाधेयौ । २०

५. पराशरमतानुसारेण द्वितीयेशद्वादशेयोः फलं कथं निरूप्यते ?

६. केन्द्रत्रिकोणाधिपयोर्योगाकारकत्वावस्थां लिखत ।

७. यदि केन्द्रे त्रिकोणे वा निवसेतां तमोग्रहौ ।
नाथेनान्यतरेणापि संबन्धाद्योगकारकौ ॥ पद्यस्यास्य व्याख्या कार्या ।

८. मारकत्वे शनेर्वैशिष्ट्यं किम् ?

त्रयः प्रश्नाः समाधेयाः । ३×१०=३०

९. सर्वाङ्गयोगं प्रदर्शयत ।

१०. शुभानपशकुनान् लिखत ।

११. वास्तुपूजने लग्नतिथिवारशुद्धिः प्रदर्शनीया ।

१२. वधूप्रवेशे नक्षत्रशुद्धिं लिखत ।

१३. गृहारम्भे सूर्येन्दुगुरुशुक्राणामस्तादिकारणेन जनितफलं लेख्यम् ।

चत्वारः प्रश्नाः समाधेयाः । ४×५=२०

१४. राज्ञः सन्धिविरोधज्ञानस्यैको योगो लेख्यः ।

१५. प्रश्नकर्तुः साफल्यविफल्ययोः परिज्ञानोपायः कः ?

१६. विदेशे स्थितस्य जनस्य जीवितमरणे कथं विचार्येते ?

१७. जातकस्य सर्वार्थसिद्धियोगलक्षणं लिखत ।

१८. प्रवासिनामागमनकालयोगं लिखत ।

१९. नष्टवस्तुनो दिग्ज्ञानप्रकारः कः ?

समाप्तम्